लोके शब्दार्थसम्बन्धो रूपं तेषां च यादृशम्।
न विवादस्तत्र कार्यो लोकोच्छित्तिस्तथा भवेत् ॥ २ ॥
ब्रह्मवादे निरुक्तिस्तु न वक्तव्यैव कुत्रचित् ।
वस्तुतो ब्रह्म सर्वं हि व्यवहारस्तु लोकतः ॥ ३ ॥
ये धातुशब्दा यत्रार्थे उपदेशे प्रकीर्तिताः ।
तथैवार्थो वेदराशेः कर्तव्यो नान्यथा क्वचित् ॥ ४ ॥
काण्डद्वयार्थसिद्ध्यर्थं स्वाध्यायविधिरुच्यते ।
'स्वाध्यायोध्येतव्यः ।' 'अष्टवर्षं ब्राह्मणमुपनयीत
तमध्यापयीत ।' 'सांगो वेदोध्येयो ज्ञेयश्चे'ति ।
वाक्यत्रयं तथा वेदेऽनारभ्योक्तमेव हि ॥ ५ ॥

वैदिकस्तत्सादृश्येन बोध्यते इति बोधने उपकारकः। अतो लोके शब्दार्थयोर्यः सम्बन्धः साङ्केतिकः । च पुनः तेषां यादृशं रूपं तत्र विवादो न कार्यः । यतस्तत्र विवादे क्रियमाणे लोकोच्छित्तिर्भवेत् । 'युक्तयः सन्ति सर्वत्र भाषन्ते ब्राह्मणा यथे'ति 'नैतदेवं यथात्थ त्वं यदहं वच्मि तत्तथा, एवं विवदतां हेतुः -शक्तयो मे दुरत्यया' इति भगवदुक्तन्यायस्य तत्रापि तुल्यत्वात् । अतः सिद्धरूपस्य लौकिकस्योपकारकत्वमात्रं ग्राह्यम्, न तु तेन कश्चित्तत्त्वनिश्चय इति। तत्र विवादो व्यर्थत्वान्नास्माभिः कार्य इत्यर्थः ॥१,२॥

तर्हि ब्रह्मवादे न कार्य इत्यत आहुः ब्रह्मेत्यादि । तथा चाखण्डब्रह्मवादेनापि वैदिकव्यवहारासिद्धेस्तेनापि न कार्यः, किन्तु सखण्डब्रह्मवादे लोकस्य 'प्रजायेये'तीच्छया सिद्धत्वात्तत्सिद्धेन शास्त्रसम्मतेन लोकेन कार्य इत्यर्थः ॥ ३ ॥

तत्र प्रकारमाहुः य इत्यादि ॥ ४ ॥

एवं वादकरणप्रकारं चतुर्भिरुक्त्वा विवादविषयमाहुः काण्डेत्यादि । अर्थसिद्ध्यर्थमिति । प्रयोजनसिद्ध्यर्थम्। न ह्यवैधप्रकारेणाधीते वेदे धर्मस्तज्जन्यं फलं वा सिध्यतीति तदर्थं स्वाध्यायविधिः स्वाध्यायप्रकार उच्यते वेदे निरूप्यत इत्यर्थः। तत्र गमकमाहुः वाक्येत्यादि । तथेति प्रकारबोधकम् । आद्यं वाक्यं तैत्तिरीयब्राह्मणस्थम्, अन्यद्द्वयं शाखान्तरीयम् । तत्र केचिदध्यापयीतेत्यत्र अध्यापयेदिति पठन्ति । तृतीयं च 'ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्चे'तिपठन्ति । एतेषां सर्वसाधार ॥ याहुः अनारभ्योक्तमेवेति। तथा चैकतरनियामकाभावात् सर्वशाखिसाधारणमित्यर्थः

एकार्थता तु सर्वत्र विशेषोऽप्युच्यते स्फुटः ।
स्वाध्यायशब्दो वेदे हि रूढो योगोऽपि वर्तते ॥ ६ ॥
सुष्ठ्वासमन्तादध्येयः शोभनैर्नियमैर्युतः ।
देशे काले गुरौ स्वस्मिन्नपेक्ष्यन्ते गुणा इह ॥ ७ ॥
आ सर्वतः पुनस्तत्र यथा शङ्का न जायते ।
शब्दे ह्यर्थे ह्यनुष्ठाने तथाध्येयो हि वैदिकैः ॥ ८ ॥
अपर्णताद्यपहतपाप्मादिसकलैर्गुणैः ।
प्रजापतिमुखैर्वेदो यथा हि पठितः पुरा ॥ ९ ॥

अन्यथैतदुक्तप्रकारेण न सर्वे पाठयेयुः पठेयुश्चेति । तर्हि वाक्यत्रयस्य किं प्रयोजनमित्यत आहुः एकार्थतेत्यादि । तुरुक्तशङ्कानिरासे । सर्वत्र त्रिष्वपि वाक्येषु स्वाध्यायप्रकारबोधनेन यद्यप्येकार्थता एकवाक्यत्वम्, तथापि विशेषः स्फुट उच्यते । अतः स एव प्रयोजनमित्यर्थः ॥ ५½ ॥

कथं तस्य प्रयोजनत्वमित्याकांक्षायां प्रथमं पूर्ववाक्यगतं विशेषं पञ्चभिर्विवृण्वन्ति स्वाध्यायेत्यादि । तथा च सुष्ठु आसमन्तात् यथा स्यात्तथा योधीयते ,सः स्वाध्याय इत्ययं योग इत्यर्थः । सु इत्यस्यार्थः शोभनमित्यादि । तच्च अध्ययनेऽपेक्षितदेशकालगुरुशिष्यगतगुणविशिष्टत्वम् । आङोर्थस्तु पुनस्तत्रेत्यादिनोच्यते । हिः सर्वत्र निश्चयार्थः । तथा च शब्दार्थानुष्ठानेषु शङ्काराहित्यमाङर्थः । तेन स्वाङ्द्योतितार्थपूर्वकं योधीयते वेदः स स्वाध्याय इत्यर्थः । एवमध्ययनेन योतिशयोऽध्येतरि यश्च वेद आधीयते तमाहुः अपर्णतेत्यादि । 'जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते, ब्रह्मचर्येण ऋषिभ्यः, यज्ञेन देवेभ्यः, प्रजाभिः पितृभ्यः, एष वा अनृण' इति श्रुत्या 'ऋणैस्त्रिभिर्द्विजो जातो देवर्षिपितॄणां प्रभो, यज्ञाध्ययनदानैस्तानतिस्तीर्य त्यजन् पते'दित्यादिस्मृतिभिश्च ब्रह्मचर्यपूर्वकाध्ययनेनापर्णता। आदिपदोक्तो वेदोक्तसाधनकरणतत्फलाप्त्योः स्वरूपयोग्यतारूपोधिकारश्चाध्येतुर्भवति । 'अपहतपाप्मा स्वाध्यायो देवपवित्र'मितिश्रुत्युक्तमपहतपाप्मत्वमादिपदोक्तमयातयामत्वं तत्पठिते वेदे भवतीत्युभाभ्यां अध्येतृधर्मवेदधर्माभ्यां साक्षात्परंपरया च वेदस्य संस्कारेण स्वाध्यायत्वं तस्य भवति, अन्यथा तु 'छन्दांस्येनं प्रजहन्ति काले नीडं शकुन्ता इव जातपक्षा' इतिन्यायः स्यादित्यर्थः । तेन सिद्धमाहुः प्रजापतीत्यादि । स्वाध्यायेधिकारिणं बोधयितुं अध्येतव्य इति तव्यस्यार्थमाहुः

ताहग्गुणविशिष्टोत्र वेदः स्वाध्याय उच्यते ।
तव्यस्त्वावश्यके प्रोक्तो न विधिर्ज्ञातॄंर्बोधनात्॥ १० ॥
स्वाध्यायपदतो ज्ञेयं तन्माहात्म्यं फलं तथा ।

तव्य इत्यादि। स्वाध्यायब्राह्मणे 'यत्स्वाध्यायमधीयीतैकामप्यृचं यजुः साम वा ... सन्तिष्ठत' इति ब्रह्मयज्ञं लक्षयित्वा, तत्फलं तस्य यज्ञत्वसंपत्तिप्रकारं चोक्त्वा, मानुवाके कानिचित्तस्य पूर्वाङ्गानि विधाय, तेषां फलं चोक्त्वा, 'प्राङासीनः स्वा. यमधीयीत'ति विधाय, अग्रे चतुर्भिरनुवाकैस्तत्प्रकारं वदन् स्वा... ... ... 'अपहतपाप्मा स्वाध्यायो देवपवित्रम्' तदध्ययनं विना वाच्यभागं स्वर्गाभावं प्रतिपाद्य, पश्चादाह 'तस्मात्स्वाध्यायोऽध्येतव्यो यं यं क्रतुमधीते तेन तेनास्येष्टं ती'त्यादि। तेन ज्ञातपूर्वकस्याध्ययनस्यात्रोक्तत्वान्न विधिः । यदि तत्रावश्यं ... वोपेयते, तदाप्यनेनोपसंहारान्न विधित्वम् । न च ... ... 'अनधीयाना व्रात्या भवन्ती'तिवाक्यवैयर्थ्यापत्तिः । तव्यस्य ... प्राप्तकालावश्यकार्यर्थेषु विधानदर्शनादत्र तदर्थनिश्चायकत्वेनास्यावैयर्थ्याद् । पूर्वोक्त एवार्थ इत्यर्थः । न च स्वाध्यायवाक्यासन्निहितस्यानधीयानवाक्यस्य तदर्थनिर्णायकत्वमिति शंक्यम्। वाक्यलक्षणे 'अपि तु वाक्यशेषः ... कल्पस्य विधीनामेकदेशः स्या'दित्यत्र जैमिनिनैव दूरस्थस्यापि यजतिषु 'ये करोति नानुयाजेष्वि'त्यस्य 'एष वै सप्तदशः प्रजापतिर्यज्ञमन्वायत्त' इति वाक्यशे-स्तदर्थनिश्चायकत्वेनांगीकारात्। भट्टवार्तिकेपि 'येन यस्यार्थसंबन्धो दूरस्थेनापि तेन अर्थतो ह्यसमर्थानामानन्तर्यमकारण'मिति कथनाच्चेति दिक्। एतदेव निगमयितुं यपदयौगिकार्थज्ञानस्यावश्यकत्वं च ज्ञापयितुमाहुः स्वाध्यायेत्यादि । तथा च दर्शादिपदैः समुदायैक्यज्ञापनम्, एवं स्वाध्यायपदेन तन्माहात्म्यज्ञापनम्। तस्मिन् ज्ञाते भवति, नान्यथेत्यतो योगादर आवश्यक इत्यर्थः। यत्पुनः सायणीये 'स्वस्यासाधा-त्वेन पितृपितामहादिपरंपराप्राप्ता शाखा स्वाध्याय' इति योगान्तरमुक्तम्, तत्रापि स्मृत्याद्युक्तानामध्ययननियमानां वेदार्थादिसन्देहनिरासस्य चावश्यकत्वादुक्तो निर्बाध इति स योग इदानीन्तनानां मन्दबुद्धीनां तावता संकोचेनापि ... फलतीति बोध्यम्॥ १०½ ॥

१ शातुः साध्यसाधनभावबोधकस्य बोधनात्। २ तदर्थानिश्चायकेति पाठः।

ज्ञातृज्ञापनतासिद्ध्यै द्वितीयं वाक्यमीर्यते ॥ ११ ॥
वसुरुद्रादित्यैर्वर्षैस्त्रयो वर्णाः क्रमाद्द्विजाः ।
अध्याप्या इति तस्यापि नियोगः श्रुतिचोदितः ॥ १२ ॥
पराधीनतया बाले न विधिः श्रुतिचोदितः ।
तथाध्यापनसिद्ध्यर्थं तृतीयं वाक्यमीर्यते ॥ १३ ॥
साङ्गेऽधीते तथा ज्ञाते स्वाध्यायस्तस्य सिध्यति ।
अध्यापनप्रयुक्तं हि प्रथमं लिङ्प्रयोगतः ॥ १४ ॥

एवं तादृशाध्ययनस्य माणवकाधिकारकत्वं निवार्याध्ययनविध्यभावे माणवकाध्ययनार्थां प्रवृत्तिर्न स्यादिति शंकां वारयितुं द्वितीयवाक्यस्थं विशेषं स्फुटीकुर्वन्ति भ्यां ज्ञात्रित्यादि । ज्ञातुराचार्यस्य ज्ञापनतासिद्ध्यै । नन्वादित्याहुः । वैदिकशब्दाज्ञापकत्वसिद्ध्यर्थं अष्टवर्षवाक्यमीर्यते, तच्च न ब्राह्मणमात्रपरम्, किन्त्वग्रे राजन्यश्ययोरप्युपनयनस्य तत्तद्वर्षे कथनात्तादृशस्मृतेश्च त्रयोपि वर्णा द्विजत्वादध्याप्या इति । तदर्थं तस्य आचार्यस्यापि नियोग अध्यापनात्मके कार्ये प्रवर्तनरूपः । श्रुतिचोदितः संमाननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः ' इत्यनेनाचार्यकरणे विहिस्यात्मनेपदस्य श्रुत्या अध्यापयीतेति लिङ्श्रुत्या च चोदितः । अतः स्वस्याचार्यत्राय ज्ञात्रा तेऽध्याप्याः । अतो माणवकाध्ययनमध्यापनविधिप्रयुक्तमिति न माणवकस्याध्ययने प्रवृत्तिविघात इत्यर्थः । अत्र नियोगपदोक्त्या प्राभाकरमतस्यास्मिन् स्थले साधुत्वं बोधितम् । ननु किमनेन निर्बन्धेन, अध्ययनविधिनैव माणवकप्रवृत्तौ किं बाधकमत आहुः पराधीनेत्यादि । यतस्तत्र तथांगीकारे विधिव्यापारः कुण्ठो भवतीत्यतो नाद्रियत इत्यर्थः । एवं द्वितीयवाक्यगतो विशेषो विशदीकृतः ॥ १२½ ॥

एवमध्यापनविधिना माणवकस्याध्ययनप्रवृत्तौ साधितायामपि गुरुमुखादक्षरग्रहणमात्रमायास्यति, 'उपनीय ददद्वेदमाचार्यः स उदाहृत' इति याज्ञवल्क्योक्तात्तल्लक्षणात्, न त्वध्ययनस्यार्थज्ञानपर्यन्तत्वम्, तथासत्यनर्थकः स्वाध्यायपदयोगादर इत्याकांक्षायां तृतीयवाक्यगतं विशेषं व्याकुर्वन्ति प्रमाणोपन्यासपुरःसराभ्यां सार्धाभ्यां तथेत्यादि । साङ्गस्य वेदस्यार्थज्ञापनपूर्वकाध्यापनसिद्ध्यर्थं तृतीयं वाक्यमीर्यते, यतः स्वयं गुरुणा साङ्गेऽधीते ज्ञाते वेदे तथा तेन प्रकारेण स्वाध्यायः सम्यक्प्रकारकमासमन्तादध्ययनं तस्य शिष्यस्य सिध्यति, हि यतो हेतोः प्रथममध्ययनं अध्यापनप्रयुक्तं

आत्मनेपदतः स्वस्य स्यातां वृत्तिश्च सेत्स्यति ।
'उपनीय तु यः शिष्यं वेदमध्यापयेत् द्विजः ॥ १५ ॥
सरहस्यं तदङ्गं च तमाचार्यं प्रचक्षते ।'
'आचार्यवान् पुरुषो वेद,' 'आचार्यं मां विजानीयात्,'
'गच्छेदाचार्यसंसदि' इति ।
स्वातन्त्र्ये च तथा जाते तस्यावश्यकमीर्यते ॥ १६ ॥
मर्यादाभङ्गतः केचित् कृत्ये विध्यर्थतां जगुः ।

विध्यर्थकलिङ्प्रयोगतः साधितं तस्मात् । न चास्य वाक्यस्य कथमध्यापनार्थत्वमिति शंक्यम् । अध्यापनवाक्ये 'उपनयीते'त्यात्मनेपदतः स्वस्य अध्यापकस्य साङ्गाध्ययनज्ञाने स्याताम् । ञितो धातोः कर्तृगामिन्येव क्रियाफले आत्मनेपदानुशासनात् । तस्य चात्राचार्यकरणरूपार्थत्वात्तस्य च 'उपनीय तु य' इतिस्मृत्युक्तलक्षणकत्वात् लक्षणवाक्ये चाध्याप्यस्य 'सकल्पं सरहस्य'मिति विशेपणबलेन तादृशाध्ययनस्य पूर्वं प्राप्ते- रध्ययनार्थज्ञाने भवतः । वृत्तिर्जीवननिर्वाहश्च तत एव सेत्स्यति । अत एतत्त्रयमात्मनेपदाल्लभ्यते । किञ्च, 'आचार्यवा'नितिश्रुत्याचार्यवतो ब्रह्मज्ञानमुक्तम् । तदप्यध्यापनद्वारकमेव । गुरोर्ज्ञाने तेन च ज्ञापन एव तद्दर्शनात् । किञ्च, पुराणेपि 'द्वितीयं प्राप्यानुपूर्व्याज्जन्मोपनयनं द्विज' इत्यादिनोपनीतमुपक्रम्य, 'आचार्यं मां विजानीया' दिति तस्याचार्ये भगवद्बुद्धिकरणं विधत्ते, स्मृत्यन्तरे चाचार्यसभायां गमनम् । तदुभयमपि तस्यावश्यकृत्यम्, अन्यथा विद्याया असिद्धेः । तच्च वयसा स्वातन्त्र्ये जात एव भवति, न त्वाहत्य बाल्ये, क्रीडनासक्तत्वात् । तस्मात् श्रुतिचोदितोऽध्ययनज्ञानयोर्विधिर्न माणवकाधिकारकः, किन्त्वध्यापनविधिप्रयुक्तमेव तदुभयं बालस्य । तदेव च स्वातन्त्र्ये तस्यावश्यकम्, तदेव वेदस्य स्वाध्यायत्वसिद्धिरित्येवं तस्य विशेपस्य प्रयोजनत्वमित्यर्थः। एवञ्च याज्ञवल्क्येपि सरहस्यस्य साङ्गस्य वेदस्य दानमङ्गीकर्तव्यमित्यविरोधः ॥ १५ ॥

एवं वाक्यत्रयगतं विशेपं व्याख्याय भाट्टमतमस्मिन् विपय आहुः मर्यादेत्यादि । केचित् भाट्टाः कृत्ये अध्येतव्य इत्यादौ प्रत्यये विध्यर्थतां जगुः। 'प्रैपानुवादप्राप्तकालेषु कृत्याश्चे'तिसूत्रेण तेपां विधौ विधानादुक्तवन्तः, पूर्वोक्तरूपं शब्दार्थं अनपेक्ष्य अविवक्षितत्वेनाभिसन्धाय स्वबुद्धितो निर्णयं चोक्तवन्तः । तत्र हेतुः मर्यादाभङ्गत इति । यदि

---

१ अत एव तद्देयमिति पाठः । २ ज्ञानमिति पाठः । ३ प्रैषातिसर्गप्राप्तकालेषु कृत्याश्चेति पाठः पा. ३-३-१६३ ।

शब्दार्थमनपेक्ष्यैव निर्णयं च स्वबुद्धितः ॥ १७ ॥
अध्यापनप्रयुक्तं हि तस्मादध्यापनं मतम् ।

ध्ययने विधिर्नाङ्गीक्रियेत, तदा अग्निहोत्रादिष्वधीतवेदानां त्रैवर्णिकानामेवाधिकारः, नानधीतवेदानां शूद्राणामिति नियमात्मिका मर्यादा भज्येत । असत्यध्ययनविधौ विद्वांसमधिकृत्य प्रवर्तमानान्यग्निहोत्रादिशास्त्राणि विद्यां विनानुष्ठानासंभवाद्विद्यामाक्षिपन्त्यविशेषाच्चतुरोपि वर्णानधिकुर्युः । सति चाध्ययनविधौ 'वसन्ते ब्राह्मणमुपनयीते'त्यादिवाक्येषु द्वितीयानिर्देशादुपनयनसंस्कृतास्त्रैवर्णिकाः किमस्माभिः कर्तव्यमित्यपेक्षन्ते । तत्सन्निधौ चानिर्दिष्टकर्तृकमध्ययनं कर्तारमपेक्षते इत्यपेक्षासन्निधियोग्यत्वैरेवं ज्ञायते, यत्त्रैवर्णिकैरुपनीतैरध्ययनेनाक्षरग्रहणपरंपरया अर्थज्ञानं कर्तव्यमिति । एवमुपनयनाध्ययनविध्योरेकवाक्यत्वे त्रैवर्णिकानां यज्ञाद्यधिकारार्थोऽयं[१] नियमविधिः । एतेन विमतं वेदाध्ययनं अर्थज्ञानहेतुः, अध्ययनत्वात्, भारताध्ययनवदित्यनुमानेनार्थज्ञानस्य प्राप्तत्वात् तदर्थं नापूर्वविधिः । अनारभ्याधीतत्वाच्छ्रुत्याद्यभावाच्च न क्रत्वर्थं नियमविधिः, अतोऽदृष्टार्थमेव स्वाध्यायाध्ययनविधिरित्यक्षरमात्रग्रहणं कृत्वा समावर्तितव्यम्, न त्वर्थज्ञानाय 'गुरुगृहे स्थित्वा वेदमधीत्य स्नाया'दिति स्मृतिर्बाधनीयेति पूर्वपक्षोपि निरस्तः । दृष्टस्य फलस्य लाभे अदृष्टकल्पनाया अनुचितत्वात् । न चाध्ययने विधेः कल्पने तत्र नियोज्यकल्पनापत्तिः । अध्यापनविधिना तत्रास्यंगीकारे तूपनीतस्याध्यापनेधिकारात्तत एवाध्ययनप्राप्तेर्न तत्कल्पनमिति लाघवमिति वाच्यम् । उपनयतिकर्मत्वेन विवक्षिते माणवके ब्राह्मण(संस्कार्यं कर्म) मित्यादिकया द्वितीयया प्राधान्यबोधनादुपनयनस्य माणवकसंस्कारतया प्रधानकर्मत्वाभावेनाध्यापनार्थताया अयुक्तत्वादध्ययनार्थत्वान्तरङ्गत्वाद्युक्तत्वा[३] । तथा सत्यध्ययनविधावुपनीतस्य विश्वजिदादिवन्नियोज्यत्वकल्पनं आवश्यकमिति गुरुभूतस्यापि तस्य प्रामाणिकत्वेनादुष्टत्वात् । अध्ययनविध्यानर्थक्यस्य चोक्तनियमेनैव वारितत्वात् । अतोऽध्ययने विध्यनंगीकारे उपनयनविधावदृष्टकल्पना सन्निधिवैयर्थ्यमधिकारिनियमभङ्गश्चेति दोषत्रयम् । तत्र तदंगीकारे तूपनयनस्य फलं दृष्टमध्ययनम्, तस्य चार्थज्ञानम्, तस्याप्यनुष्ठानमिति न क्वाप्यदृष्टकल्पना, नापि सन्निधिवैयर्थ्यम्, नाप्यधिकारिनियमभङ्ग इति विध्यर्थ एव कृत्य इत्यर्थः ॥ १७ ॥

एवं तन्मतमनूद्य तस्य शैथिल्यं बोधयन्ति अध्यापनेत्यादि । हि यतो हेतोः

१ अध्यापनविधिविषयत्वं ब्रह्मवादस्योक्तम् । अध्ययनमिति पाठः । २ स्वाध्यायोध्येतव्य इत्ययं नियमविधिः । ३ प्रधानकर्म क्रियाकर्माभावेनेति पाठः ।

एतर्ह्यपि तथैवैतन्न कार्या कल्पना ततः ॥ १८ ॥

अध्ययनं अध्यापनमयुक्तं तस्मादध्यापनमेव पूर्वोक्तदोषनिवारकं गुणजनकं च मतम् । अध्ययनं मतमिति पाठे तु यस्मात् केचिच्छब्दार्थमनपेक्ष्य तथा जगुः, तस्माद् हि निश्चयेन अध्ययनमध्यापनप्रयुक्तं मतमिति यत्तदोर्नित्यसम्बन्धेन यस्मादित्याध्याहृत्य योजनीयम् । एतर्हीदानीमपि तथैवाध्ययनम् । ततो दृष्टानुरोधादुक्तरीत्या कल्पनं न कार्यम् । अयमर्थः । यदुक्तं त्रैवर्णिकाः कर्तव्यमपेक्षन्ते, अध्ययनं च कर्तारमपेक्षत इत्यस्ति परस्पराकांक्षेति. तत्तथैव, परन्त्वेतद्विचारणीयम्, किमध्ययनं विद्वत्तायोग्यं कर्तारमपेक्षते, तदयोग्यं वेति । नान्त्यः । तादृशे फलानिष्पत्तेः । आद्यश्चेत्, तदा माणवकं नापेक्षत इत्येव वक्तव्यम् । फलोपधायिकाया योग्यतायास्तत्राभावात् । नच त्रैवर्णिकाधिकारनियमव्याहतिः । अष्टवर्षवाक्य उपनयनाध्यापनयोः सन्निधानादध्ययनं विना चाध्यापनासिद्धेस्तदाक्षिप्तेनैवाध्ययनेनोक्ताधिकारनियमसिद्धेः । अतोध्ययने पुनर्विधिकल्पनं व्यर्थम् । न चाध्ययनवाक्यवैयर्थ्यम् । वेदस्य स्वाध्यायत्वाय तदावश्यकताबोधनेनार्थवत्त्वादित्युक्तम् । न चावश्यकार्थेनुशासनाभावः शंक्यः । 'आवश्यकाधमर्ण्ययोर्णिनि'रित्येतदनन्तरं पठितेन 'कृत्याश्चे'तिसूत्रेण तत्रानुशासनात् । नचाध्यापननियोगे नियोज्याभावादध्यापनसमभिव्याहृतेनोपनयीतेत्यात्मनेपदेनाचार्यकरणलाभे तत्कामिना नियोज्याकांक्षा पूरणीया । तथा सत्यध्यापनस्याचार्यत्वसिद्धिरेव प्रयोजनम्, नत्वर्थज्ञापनम्, ततश्च सिद्धे आचार्यत्वे तस्यार्थज्ञापनावश्यकत्वाभावान्माणवकस्याविद्वत्तायां यज्ञाद्यनधिकारतादवस्थ्यमिति वाच्यम् । आचार्यलक्षणस्मृतिस्थस्य 'सरहस्य-मित्यादिविशेषणस्य बलेनाचार्यत्वशरीर एवार्थज्ञापनस्य प्रविष्टतया तस्य ज्ञापनावश्यकत्वे शिष्यस्य सुखेन विद्वत्त्वसंभवात् । न च सकृदुच्चारितस्य लिङ्प्रत्ययस्य विध्यर्थत्वमर्थज्ञापनार्थत्वं चेति साध्यद्वयापत्त्या वैरूप्यमितिशंक्यम् । अर्थज्ञापनस्य आचार्यत्वरूपादर्थादेव प्राप्त्या विधेस्तादर्थ्यस्याकल्पनात् । नचैवं वैरूप्याभावेप्यध्यापनाक्षिप्तमध्ययनं किमर्थज्ञानार्थम्, उताचार्यत्वार्थम् । आद्ये अध्ययनस्य स्वाध्यायसंस्कारत्वाद् गुणकर्मत्वम्, द्वितीये तु नियोगार्थत्वात्प्रधानकर्मत्वमिति वैरूप्यापत्तिरितिवाच्यम् । व्यक्तिभेदेनादोषात् । आद्यस्य प्रधानकर्मताया अनन्तराणां गुणकर्मतायाः सुखेन वक्तुं शक्यत्वात् । नन्वष्टवर्षवाक्योक्ते विधिद्वये नियोज्यानुक्तावप्युपनयीतेत्यस्य समभिव्याहारादाचार्यत्वकामिन एवोभयत्रापि नियोज्यतोच्यते । कर्मता त्वाद्ये त्रैवर्णिकमाणवकस्य, द्वितीये तु तस्यैवोपनयनसंस्कृतस्येत्येतावान् विशेषः । प्रतीयते चोपनयनाध्यापनयोरुभयो-

१ विधिनियोज्यस्याध्यापनस्याभावादित्यर्थः ।

रपि माणवकप्राधान्यबोधिकया द्वितीयया माणवकसंस्कारत्वात् गुणकर्मत्वम् । नियोज्य-विचारे तूभयोरप्याचार्यत्वसिद्ध्यर्थत्वात्प्रधानकर्मत्वमिति वैरूप्यं तु दुर्वारमिति चेत् । न । द्वितीयायाः प्राधान्यबोधकत्वस्यानियतत्वात् । 'विप्राय गां ददाती' त्यादौ व्यभिचारात् । अतो न द्वितीयया संस्कारकर्मत्वनिश्चयः, किन्तूपनयनस्य संस्कारेषु स्मरणात्संस्कार-कर्मत्वम् । तस्य च माणवकसमवेतत्वेनान्तरङ्गत्वादध्ययनाङ्गत्वेपि तमिति द्वितीयान्तेन संस्कारविशिष्टमाणवकपरामर्शा'त्तस्य च वत्समालभेते'त्यत्र वत्सस्यालभनाङ्गत्ववदध्याप-नाङ्गत्वे सिद्धे तद्विशेषणस्योपनयनस्यापि परंपरयाध्यापनाङ्गत्वं निर्बाधम्, तथापि न साक्षा-दाचार्यताहेतुत्वम्, तावन्मात्रेण तदसंभवात्, अत आत्मनेपदेनापि परंपरयाङ्गता बोध्यते, न तु साक्षादङ्गता । अध्यापनस्य तु साक्षादेवाचार्यताहेतुत्वम्, तद्विना तदभावात् । अत-स्तस्य प्रधानकर्मत्वमिति साक्षात्परंपराविभागे कोपि न वैरूप्यलेशः । एवं चात्मनेपदस्य विशेषविधानमपि सार्थकं भवति, उपनयनफलस्याध्ययनस्य कर्त्रगामित्वात् । उपनयन-स्याचार्यताहेतुत्वे तु ञित्वादेव नयतेरात्मनेपदसिद्धेर्विशेषविधानवैयर्थ्यमेव स्यात् । न च 'अग्नीना दधीते'त्यत्र यथा आधानफलस्याहवनीयत्वादेरग्निसमवेतत्वेपि न तादर्थ्यमि-त्यात्मनेपदबलादध्यवसीयते, तथात्राप्युपनयनफलस्य संस्कारस्य माणवकसमवेतत्वेपि न तादर्थ्यम्, अपि त्वाचार्यार्थत्वमेवेति विशेषविधानवैयर्थ्यमाशङ्कनीयम् । साक्षादाचार्यार्थ-त्वभावस्योक्तत्वात् । परंपरया तादर्थ्यस्य चाप्रयोजकत्वात् । विधिद्वयसमभिव्याहारेण ताद-र्थ्यपरंपराया अध्यापनाङ्गतायामेव पर्यवसानात् । परंपरयापि नाध्यापनाङ्गत्वमिति न वक्तुं शक्यम्, तमित्येतेन पूर्वपरामर्शस्य विरोधापत्तेः । एतेनैव 'यथाग्निष्टो यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोती'ति यूपपरिव्याणं यूपार्थम्, न तूपाकरणार्थम्, तथोपनीयेति स्मृत्युक्तमुपनयनं माणवकसंस्कारार्थम्, नत्वध्यापनार्थमित्यपि प्रत्युक्तम् । तमितिश्रौतेन पदेन प्रमितायाः परंपराङ्गताया दृष्टान्तमात्रेण बाधितुमशक्यत्वात् ।

यत्तु उपनीतव्यापारापेक्षायामुपनयनं प्रक्रम्य विहितस्याध्ययनस्याध्यापनोपकार-कत्वे तच्छेषत्वादर्थज्ञानार्थता न स्यात् । साध्यद्वयस्यैकत्रासंभवादित्युक्तम् । तदपि शिथि-लम् । एकस्मिन्नेव भोजने प्रतिकवलं तुष्टिपुष्टिक्षुदपायानां दर्शनात् । एकेनैव वाहनकरणेन गमनेन सुखविशेषस्योद्देश्यदेशप्राप्तेश्च दर्शनादिति । यदप्यध्यापनस्याध्ययनमन्तरेणासंभ-वात्पदार्थस्वभावाक्षिप्तमध्ययनं लौकिकमेवाङ्गीकार्यम्, तावताप्यध्यापनसंभवात्, विहित-स्यापि तत एवांगीकारे तु ततो नापूर्वं सिध्येत्, उद्देशाभावादित्युक्तम् । तदपि तथा । लौकिकस्य तस्याङ्गीकारे आचार्यत्वासिद्धेः । वेदाध्यापनेनैव तत्स्मरणात् । न

१ माणवकसंस्कारे हेतुः । २ अध्यापनत्वेपि पाठः । ३ हेतुत्वेन । ४ यथा निष्ट्वा ।

तत्र संशयमापन्ना बुद्धिर्वाक्यार्थनिर्णये ।
एकवाक्यत्वसंदेहादैकार्थ्याभावतः स्फुटम् ॥ १९ ॥
स एकोर्थोत्र वक्तव्यो यच्छरीरप्रवेशतः ।
एकार्थतां श्रुतिर्याति तदभावे तु निष्फला ॥ २० ॥
कुण्ठितैव भवेन्नूनं वेदाध्ययनबोधने ।
'वेदोखिलो धर्ममूलं' 'धर्मो यस्यां मदात्मकः' ॥ २१ ॥
एवं पूर्वर्षिभिः प्रोक्तं जैमिनिः प्रथमं स्वयम् ।
निश्चित्य लोकशिक्षार्थमर्थप्राधान्यतस्तथा ॥ २२ ॥
धर्मं विचारयामास प्रामाण्यादिपुरःसरम् ॥

चापूर्वासिद्ध्यापत्तिः, आचार्यकृतोद्देशेनापि तत्संभवात् । जातेष्टौ पितृकृतोद्देशवदिति । किञ्च, वेदस्याध्ययनं सर्वं गुर्वध्यापनपूर्वकम्, वेदाध्ययनसामान्यादधुनाध्ययनं यथेत्याधुनिकाध्ययनं दृष्टान्तयद्भिरध्ययनस्याध्यापनप्रयुक्तत्वेऽपि स दृष्टान्तोङ्गीकार्यः । तस्माद्ध्ययनेधिकारनियमस्याध्यापनविधिनैव सिद्धेः क्रत्वे विध्यर्थत्वकल्पनं वृथैव । उक्तप्रकारं विना तावन्मात्रेण वेदस्य स्वाध्यायत्वासिद्ध्या ततः फलासिद्धेरिति ॥ १८ ॥

एवं प्रकारबोधनपूर्वकं मतान्तरनिराकरणेन वेदस्य यथा स्वाध्यायत्वसिद्धिः, तत् साधितम् । तन्मध्ये शब्दार्थानुष्ठानेषु शङ्काराहित्यं प्रविष्टम् । तत्र शब्दे तद्राहित्यस्य गुरुपरंपरया सिद्धेः पदार्थेऽनुष्ठाने च तद्राहित्यस्याप्यङ्गविचारादिभिरेव सिद्धेर्वाक्यार्थे संदेहोवतिष्ठते, तदाहुः तत्रेत्यादि ऐकार्थ्याभावत इति । यागदानादिरूपाणां नानार्थानां तत्र नानाफलानां च प्रतिपादनेन तथात्वात् ॥ १९ ॥

तथा सति को दोष इत्याकांक्षायां सार्धेन तन्निराकृतेरावश्यकत्वायाहुः स इत्यादि । तथा च तदभावे वेदाध्ययनबोधकवाक्यत्रयवैयर्थ्यमेव दोष इति तदभावाय वेदस्यैकार्थ्यमवश्यमेव विचारणीयम् । तच्चाङ्गैर्न सिध्यतीत्यर्थः ॥ २० ½ ॥

तर्हि तत्र का गतिरित्याकांक्षायां मीमांसैव गतिरित्याहुः वेदोऽखिल इत्यादिद्वाभ्याम् । अत्र प्रथमं वाक्यं मानवम्, द्वितीयमेकादशस्कन्धीयं भागवतम् । तत्सर्वं पूर्वप्रोक्तं जैमिनिः प्रथमं स्वयं निश्चित्य पश्चाल्लोकशिक्षार्थमर्थप्राधान्यमङ्गीकृत्य प्रामाण्यादिपुरःसरं को धर्मः कथं तस्य धर्मत्वं कथं च वेदस्य तत्प्रमितिजनकत्वं कथं च

---

१ अर्थबलविचारकमताहुः ।

ज्ञाननिष्ठाय देयानि कव्यानीति यथा तथा ।
फलश्रुत्या पूर्वकाण्डसमाप्त्या चावगम्यते ॥ २७ ॥
ब्रह्मविद् ब्रह्म भवति परं वाप्नोति कुत्रचित् ।

एतमेकवाक्यताप्रकारं दूषयन्ति ज्ञाननिष्ठायेत्यादिभिः सार्धैस्त्रिभिः । इदं वाक्यं सप्तमस्कन्धीयम् । तत्र यथा पितृणां तृप्त्यानन्त्याय ज्ञाननिष्ठाय कव्यदानमुक्तम् । तावता न ज्ञानस्य श्राद्धशेषत्वं सिध्यति । दानफलानन्त्येन कर्त्रनुग्रहार्थं संप्रदानताया अनुमतिमात्रत्वात् । अन्यथा ज्ञाननिष्ठः कव्यानि भुञ्जीतेत्येव विदध्यात् । एवं ब्रह्मिष्ठवाक्येऽप्यनुमतिरेव क्रियते । ब्रह्मदृष्ट्या कर्मवैषम्यनिवृत्त्या तदनुग्रहार्थम् । वस्तुतस्तु तत्र ब्रह्मशब्दो वेदपर इति न तेन वेदान्तस्य कर्तृशेषत्वसिद्धिः । नापि यदेवेति श्रुत्या । तस्या उद्गीथप्रकरणावरुद्धत्वेन विद्यान्तरासंग्राहकत्वात् । उद्गीथविद्यायाः कर्माङ्गत्वेऽप्यक्षतेः । अतोऽनुमतस्य प्रासंगिकत्वेन ग्रामं गच्छतस्तृणस्पर्शवद्विशां चरतस्तस्य कव्याशनस्य प्रासंगिकत्वान्न तेन शेषत्वसिद्धिः । भट्टकारिकोक्तप्रकारस्तु भाष्यप्रकाशे दूषित इति नात्र दूष्यते । तथा च पारार्थ्यमेव जैमिनीये मते शेषलक्षणम् । तच्च श्रुत्यादिभिरवगम्यते । तथा सति 'कर्माण्यपि जैमिनिः फलार्थत्वा'दिति सूत्रे कर्मणः फलशेषत्वं पूर्वकाण्डे प्रतिपाद्यत इति न तस्य ज्ञानशेषत्वम्, तथा ज्ञानस्यापि फलशेषत्वमुत्तरकाण्डे प्रतिपाद्यते, 'ब्रह्म वेद ब्रह्मैव भवती'ति, 'ब्रह्मविदाप्नोति पर'मिति । अन्येऽपि देशकालादयो य उच्यन्ते 'विविक्तदेशे च सुखासनस्थ' इत्यादौ, तेऽपि तत्साधनभूता इति सर्वे वेदान्ता ज्ञानमेव सफलं बोधयन्तो निराकांक्षतामापद्यमाना न शेषित्वेन कर्मापेक्षन्ते । नापि वेदो ज्ञानं शेषत्वेनापेक्षते । ब्रह्मशब्दस्य शब्दब्रह्मण्यपि वृत्तेर्ब्रह्मिष्ठशब्देनापि वेदार्थनिष्णातस्य ग्रहीतुं शक्यत्वात् । तस्मान्न कर्तृशेषत्वम् । नापि विविक्तात्मस्वरूपबोधकत्वेन । वैराग्यापत्त्या कर्मानधिकारापादकत्वात् । देहविशिष्टस्तु न तत्र बोध्यत इति कथमपि वेदान्तानां न वेदशेषता । किञ्च, 'वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ती'ति शीक्षोपनिषदि तैत्तिरीयाणां श्रूयते । तत्र 'चानूच्ये'ति वेदपाठनसमाप्तिबोधनादपि शेषत्वं न युक्तमित्यर्थः । किञ्च । शास्त्रान्तरेऽपि एवमेव फलभेदेन समाप्तिभेदेन च शास्त्रभेदोऽवगम्यते । तथा वैदिकानामप्येवमेव भेदोऽवान्तरकाण्डानां मतः । अतो भेदकानां बहूनां सत्त्वात् संहर्तुर्हेतोश्चाभावात् स्वतंत्रतोपनिषदां वाच्या । भिन्नशास्त्रत्वमेवास्थेयम् । तथा चेत् युक्तिभिः प्रमाणैश्च तथा निश्चितं चेत्, तदा नैकवाक्यता घटते । अततस्तदुक्तः प्रकारो न युक्त इत्यर्थः ॥ २७ ॥

१ पुरुषार्थोऽतः शब्दादित्यधिकरणस्य भाष्यप्रकाशे ।

'वेदमनूच्य आचार्यः' इत्युक्तोपनिषद्वचः ॥ २८ ॥
शास्त्रान्तरेऽप्येवमेव वैदिकानां मतं तथा ।
अतः स्वतन्त्रता वाच्या तथा चेन्नैकवाक्यता ॥ २९ ॥
'वेदोऽखिलो धर्ममूल'मित्यादिश्च विरुध्यते ।
वैदिकानामभिध्यानं स्वरादिनियमैर्युतम् ॥ ३० ॥
वेदा एव न चान्यार्था वाच्या बुद्धिमता क्वचित् ।
अतो वेदान्तवाक्यान्यप्रसिद्धिः । वैदिकानामपि तथैव प्रसिद्धिरितिचेत् ।

किञ्च । शास्त्रभेदानङ्गीकारे पूर्वोक्तस्मृतिविरोधोपीत्याहुः वेद इत्यादि । अत्र स्मृतावखिलपदात् धर्मस्य च क्रियारूपत्वात् ज्ञानप्रतिपादकवेदान्तसंग्रहे तस्य बाधात् । द्वितीयवाक्ये धर्मपदाच्च विरुध्यत इत्यर्थः ॥ २९½ ॥

अत्र पुनर्मतान्तरमुपक्षिप्य दूषयन्ति वैदिकेत्यादि । यतो वैदिकाः स्वरपूर्वकमनध्यायादियागनियमपूर्वकं वेदान्तान् पठन्ति पाठयन्ति चेति वैदिकानां वेदान्तेषु वेद इत्यभिध्यानं स्वरादिनियमैर्युतं वर्तते, अतो वेदा एव क्वचित् वेदान्तभागे अन्यार्था धर्मव्यतिरिक्तब्रह्मार्थाः बुद्धिमता न च वाच्या नैव वाच्याः । अत इदं मतमप्रयोजकम् । तत्र हेतुः अत इत्यादि । अतः वेद इति प्रसिद्धेः सकाशात् वेदान्तवाक्यानामन्याप्रसिद्धेः । शिष्टा हि वेदान्तवाक्यान्युपन्यस्य इतिश्रुतेरितिश्रावणादित्येव वदन्ति । यदि हि वेदान्तवाक्यानि अन्यार्थानि स्युः, तदा वेद इति प्रसिद्धिं न लभेयुः । वेद इति प्रसिद्धेः धर्मार्थतामूलकत्वात् । अतो वैदिकाभिध्यानाद्वेदान्तेषु यदि वेदत्वमङ्गीकार्यम्, तदा अन्यार्थता त्याज्या । यद्यन्यार्थताङ्गीक्रियते, तदा वैदिकाभिध्यानं नादर्तव्यम् । शास्त्रभेदस्य श्रुतिस्मृतिरूपप्रबलप्रमाणप्रमितत्वादभिध्यानस्य च सदाचारे प्रवेशेन ततो नैर्बल्यात् । पूर्वोत्तरवाक्यद्वयसंहर्तुरैक्यस्याभावे वेद इति प्रसिद्धिमात्रेण तयोरेकवाक्यताया असिद्धेरित्यर्थः। ननु सत्यमभिध्यानस्य श्रुत्याद्यपेक्षया निर्बलत्वम्, तथाप्यनादिप्रसिद्धिबीजं तु वक्तव्यमित्याशयेन पर्यनुयुङ्क्ते वैदिकानामित्यादि । वैदिकानामपि तथैव वेद इतिवत् वेदान्त इत्येव प्रसिद्धिः । तथा च वेदान्तेषु वेदत्वानङ्गीकारे प्रसिद्धिवैयर्थ्यमापद्यमानं तस्यै[1] बलिष्ठत्वं कल्पयिष्यति । 'आनर्थक्ये प्रमाणानां विपरीतं बलाबल'मितिन्यायात् ।

---

१ वैदिकाभिध्यानरूपस्य सदाचारस्येत्यर्थः ।

चेन व्यवहारसिद्ध्यर्थमङ्गीकर्तव्याः । तथा च घटादिशब्दा अरुणादिशब्दवद्धर्मवाचकाः ।

न च स्वरूपतः सतो भिन्नाः प्रत्यक्षतः स्वीकर्तव्या इति वाच्यम् । कारणीभूतस्य सतः एकत्वात्कार्ये कुतो भेदः समायाति ।

सर्वेषां सद्धर्मवाचकताया लोकयात्रानिर्वाहाय व्यवहारसिद्धेश्चावश्यकत्वात् आकृतिविशेषर्य्यायाः कंबुग्रीवायाताननवितानादिसास्नादिमदाकृतिविशेषप्रकाश्याः सतो धर्मास्ते घटपटगवाद्या भिन्नाः सतः सकाशाद्व्युच्चरणेन विलक्षणप्रतीतिविषयाः, एवं शक्तिसंकोचेन अयं शब्द एतदाकारकमेव सद्धर्मं बोधयतु, नान्याकारकमित्येवंप्रकारकेणेश्वरकृतेन वाचकशक्तेर्नियमनेन व्यवहारसिद्ध्यर्थमङ्गीकर्तव्याः । तथा च घटादिशब्दा अरुणादिशब्दवद्धर्मवाचका इत्यङ्गीकारे सर्वेषां ब्रह्मत्वस्य ऐकार्थ्येपि व्यवहाराप्रतिरोधस्य च सिद्धेर्न प्रयासवैयर्थ्यमित्यर्थः ।

ननु शब्दः प्रत्यक्षं चेत्युभयमपि प्रमाणम् । तयोः शब्दापेक्षया प्रत्यक्षमेव प्रबलम्, शब्दोपजीव्यत्वात्सर्वसंमतत्वाच्च । अतः प्रत्यक्षतः प्रतीयमानं स्वरूपतो भेदेन सत्त्वं भेदं च न्यक्कृत्य शब्दार्थविचारेण सर्वस्य ब्रह्मात्मकत्वसाधनमप्रयोजकमित्याशंकायां तन्निषेधन्ति न चेत्यादि । तत्र हेतुः कारणीत्यादि । अयमर्थः । सत्यं प्रत्यक्षं प्रबलम्, तथापि नास्य प्रामाण्यं सार्वत्रिकम् । देहात्मनोर्भेदेप्यभेदस्य घटाकाशमठाकाशयोरभेदेपि भेदस्य प्रत्यायनात् । अतस्तन्निश्चयार्थं प्रमाणान्तरमाश्रयणीयम् । तत्र प्रत्यक्षविषया अर्थाः पृथक् सन्तः सतो भिन्नाः भिन्नकारणकत्वात् घटपटस्तंभादिवदिति तु न युक्तम् । एते सदभिन्नाः सदेककारणकत्वात्, सौवर्णकटककुण्डलादिवदिति प्रतिसाधनेन बाधात् । कारणताग्राहकस्य सदन्वयस्यात्रानुकूलतर्कत्वेनास्य प्रबलत्वात् । न च सतो नानात्वम्, मानाभावात् । न चैवं सत्ताख्यजातिमत्त्वस्यैव सिद्धिः, न सत्कारणकत्वस्येति वाच्यम् । सत्ताया जातित्वाभावात् । सामान्यादिष्वपि वर्तमानत्वात् । न च सा प्रतीतिर्भ्रम इति वाच्यम् । नियामकाभावात् । तस्या जातित्वाभिमानस्यैवाभ्युपगमैकशरणत्वेन भ्रमत्वस्य युक्तत्वात् । अतः सद्धर्म एव सत्ता । सा चेत्सर्वत्र, तदा सर्वं सदेवेत्युपपादनमन्तरेणैव सिद्धम् । वस्तुतस्तु सत्तायां प्रत्यान्तराभावात् सदेव सच्चेति तयोगादेव सर्वत्र सदितिप्रत्ययः । सदेव च कारणम् । असतः कारणत्वायोगात् । अतः कारणीभूतस्य सत एकत्वात्तस्मिन् भेदाभावे कार्ये कुतो भेदः समायाति । कारणगुणानामेव कार्यगुणारंभकत्वादिति ।

मृद इवांशभेदादिति चेत् ।

अस्तु ।

तर्हि अंशेन भेदः । अस्ति । कः संदेहः । कार्यकारणयोर्भेद इति चेत् ।

न । कार्ये समवेतत्वात्कारणमप्यस्तीति मन्तव्यम् । तथा च कार्ये द्विगुणगुरुत्वापत्तिः । न वा भेदः प्रतीयते । पिण्डावस्थागता घटावस्था जातेत्येव प्रतीतिः । तथाचाकृतिरेव भिन्नेति धर्मभेद एव जात इति वक्तव्यम् । तथा च सतोप्यंशेन धर्मभेद एव जगज्जातमिति सदेकमेव । न चांशांशिनोर्भेदः सिध्यति । पूर्ववदेव द्विगुणभारापत्तेः ।

एवं सर्वस्य सदभेदे साधितेपि भेदं विना भिन्नार्थक्रियाकारित्वासंभवात्तदुपपादनाय कारण एव कुतश्चन भेदोभ्युपेय इत्याशयेनाह मृद इवेत्यादि । तत्रेष्टमभ्युपगच्छन्ति अस्त्विति । ततः प्रत्यवतिष्ठते तर्हीत्यादि । अंशेन भेद इति । अंशेन कृतो भेदः । तथाच कार्यस्य कारणीयांशजन्यत्वादंशांशिनोर्भेदेभ्युपगते कार्यकारणयोर्भेदोप्यर्थादेव सिद्ध इति भेददूषणं व्यर्थमेवेत्यर्थः । तन्निषेधन्ति नेत्यादि । तथाचेति । कारणगुणानां कार्यगुणारंभकत्वात् । तथा च तदभावान्न भेद इत्यर्थः । नन्वयं न नियमो यत्कारणगुणैः सर्वैरेव कार्ये गुणा आरंभणीया इति । अतः कारणगुरुत्वस्य गुरुत्वान्तरानारंभकत्वान्न कार्ये द्विगुणं गुरुत्वम् । अतस्तद्भावो नाभेदसाधक इत्यत आहुः *न वेत्यादि, एकमेवेत्यन्तम् । तथाचेति । प्रतीतेः प्रामाण्याङ्गीकारेपि । तथा*चेति । प्रतीतिबलादपि । तथा च सज्जगतोर्धर्मभेदकृतैव भेदप्रतीतिः, न स्वरूपभेदकृता । अतः प्रतीतिबलेनापि विचारे सदेकमेवेत्यर्थः । नन्वंशानां भेदस्योपगतत्वात्कुतो न स्वरूपभेदकृतेत्यत आहुः न चेत्यादि । तथाचांशांशिनोः स्वरूपभेदे सति तयोर्गुरुत्वस्य भिन्नत्वादंशे अंशिनोंशिनि चांशस्य प्रत्ययेन सत्त्वाद्गुरुत्वारंभाभावेपि स्वरूपगुरुत्वादेव द्विगुणभारापत्तिः । अतस्तयोरपि न स्वरूपभेदाद्भेदः, किन्त्वल्पत्वमहत्त्वादिधर्मभेदादेव भेद इति तदुभयमपि स्वरूपत एकमेवेत्यर्थः । अत एव सुवर्णजिघृक्षुस्तच्छकलमपि गृह्णातीति युज्यते ।

---

१ कारणे । २ कार्ये ।

अंशानामिव परस्परं भेदो नाम नानात्वं चेत् । ओमिति केचित् । 'बहु स्याम्' इति श्रुतेः । वस्तुतस्तु 'पूर्णात्पूर्णमुदच्यत' इति श्रुतेर्नांशेन नानात्वम् । कार्यावस्थायां व्यापकत्वस्य तिरोभाव एव ।

अथान्योन्याभावः । स च प्रतियोगितावच्छेदकारोपापवादलक्षणः । तथा च घटत्वं पटत्वं चैकत्र नास्तीत्युक्तं भवति ।

नैतत्सारम् । सति द्रव्ये पार्थिवे च द्वयोर्विद्यमानत्वात् । सर्व-

---

एवं स्वरूपतः सर्वस्य सदात्मकत्वे साधितेप्यंशानां परस्परं भेददर्शनेन पुनः प्रत्यवस्थानाभावाय भेदस्वरूप निश्चेतुं विकल्पयन्ति अंशानामित्यादि । केचिदिति । भास्कराचार्याः । ततोपि कश्चिद्विशेषमाहुः वस्तुत इत्यादि । उदच्यत इति । उद्गच्छति । 'अञ्चु गतिपूजनयोः' । 'अच इत्येके' इति धातुपाठात् । तथाचात्र श्रुतावुद्गमनेपि पूर्णत्वश्रावणान्नांशेन कृतं नानात्वम्, किन्तु 'बहुस्या'मितीच्छया कार्यावस्थाया व्यापकत्वे तिरोभाविते नानात्वमुद्गतं भवति । भगवतः सर्वत्र सर्वरूपत्वात् । अन्यथा असत्कार्यवादापत्तेः । तद्दूषणं तु विद्वन्मण्डनटीकायामाविर्भावतिरोभाववादे प्रपञ्चितं मयेति नानोच्यते । तस्मान्नागन्तुकं नानात्वम्, किन्त्वेकत्वाविरोधि, तदिच्छया प्रकटीभवतीति न स्वरूपैकत्वबाधकम् । न च युक्तिविरोधादयुक्तत्वं शंक्यम् । तद्विरोधस्यात्र भूषणत्वात् । 'तदेजति तन्नैजति' 'आसीनो दूरं व्रजति शयानो याति सर्वत' इत्यादिश्रुतिसिद्धत्वात् । 'न हि विरोध उभय भगवती'त्यादिस्मृतिसिद्धत्वाच्च । तस्मादेकत्वाविरोधि श्रौतं नानात्वम्, न भेद इत्यर्थः ।

तर्हि अन्योन्याभाव एव भेदोस्त्विति विकल्पमनुवदन्ति अथेत्यादि । इदं प्राचां लक्षणम् । नव्यास्तु तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकोऽभाव इत्याहुः । तत्र तादात्म्यं यदि भेदसहिष्णुरभेदः, तदा घटादिषु तादृशाभेदसंबन्धस्याभावाल्लक्षणे असंभवदोषः । तथा भेदस्य तत्र प्रवेशेन ज्ञप्तावात्माश्रयदोषश्च । अतः स चासावात्मा तदात्मा तस्य भावस्तादात्म्यमित्येव वाच्यम् । तथा सति स्वरूपसंबन्धादनतिरेकः । ततश्च प्रतियोगितावच्छेदकारोपापवाद एव पर्यवस्यतीति तथोक्तम् ।

एवं तदन[illegible] नैतत्सारमि[illegible] । द्वयोरिति । विरुद्धयोर्धर्मयोः ।
न [illegible] घटस्वरू[illegible]ति स्वरू[illegible]भावत्त्वमेव
[illegible]योगि-

गुणप्रसिद्ध्यै तथा प्रकटस्य धर्मवैलक्षण्यनिबन्धना प्रतीतिः । श्रुतिस्मृतिविद्वत्प्रतीत्या वस्तुन एकत्वे सिद्धे प्रतीतिस्तन्निबन्धनैव ।

तर्हि धर्माः स्वतो धर्मिणश्च भिन्ना इति सिद्धम् ।

नैतदप्यस्ति । तस्यैव प्रथमं धर्मरूपेणाविर्भावात् । नटस्येव

ताया वक्तुमशक्यतया तल्लक्षणकस्य तत्स्वरूपस्यैवासिद्धेः । न चाभाव एव सद्भिन्न इति वाच्यम् । तथा 'सति घटाभावोस्ति' 'घटभेदोस्ती'त्यादिप्रतीतिबाधापत्तेः । न च व्यवहारे तस्याः भ्रमत्वं शंक्यम्, व्यावहारिकदोषाजन्यत्वात् । तर्हि कुत इयं भेदप्रतीतिरित्याकांक्षायां तद्धेतुमाहुः सर्वेत्यादि । तथा प्रकटस्येति । तेन तेन रूपेण प्रकटस्य । ननु धर्मवैलक्षण्यनिबन्धनैवेयं प्रतीतिः, नान्योन्याभावनिबन्धनेत्यत्र किं गमकमत आहुः श्रुतीत्यादि । 'सदेव सोम्येदम्' 'सन्मूलाः सौम्येमाः प्रजाः' 'पुरुष एवेद९ सर्व' मित्यादिश्रुत्या, 'भूतानि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च । नद्यः समुद्राश्च स एव विष्णुर्यदस्ति यन्नास्ति च विप्रवर्य' 'विश्वं वै ब्रह्मतन्मात्रं संस्थितं विष्णुमायये'त्यादिस्मृत्या, वामदेवशुकादीनां सर्वत्रैकरूपत्वप्रतीत्या च वस्तुन एकत्वे सिद्धे यान्येषामभ्रान्ता भेदप्रतीतिः, सा धर्मवैलक्षण्यनिबन्धनैव । श्रुत्यादौ वस्त्वैक्यस्य वैलक्षण्यस्य च बोधनात्तदेव नियामकमित्यर्थः ।

अत्र पुनः शङ्कते तर्हीत्यादि, सिद्धमिति । तैरेव प्रमाणैः सिद्धम् । तथा च वृथैवायं भेददूषणाडम्बर इत्यर्थः ।

तद्दूषयन्ति नैतदित्यादि । 'सोकामयत स तपोतप्यते'त्याद्युत्तरं स्वबहुभवनस्योक्तत्वात्स्वयमेव धर्मरूपेणाविर्भवतीति धर्मा न धर्मिणः सकाशाद्भिन्नाः । नापि स्वतो भिन्नाः । स्वरूपैक्यस्योपपादितत्वात् । किन्तु भगवत एव तथा प्राकट्येन परस्परविलक्षणत्वान्नटरूपवद्भिन्नाः प्रतीयन्ते । अतो न भेददूषणं व्यर्थमित्यर्थः । अत्र यद्यप्येतावतैव निर्वाहो भवति, तथाप्युपसंहारे 'मायावादो निराकृत' इति कथनादत्र च प्रथमपदादितोग्रे एतावती त्रुटिरिति प्रतिभाति । प्रथमं धर्मरूपेणाविर्भावादित्युक्ते प्राथम्यस्य कालकृतत्वात्तेन भेदमापादयेत् । ततस्तन्निरासाय 'सदेव सोम्येदमग्र आसी'दित्यत्रोक्तस्य कालस्य बोधनार्थत्वप्रतिपादनेन भिन्नतानिराकरणम्, तत्प्रसङ्गेन एकपदस्य मुख्यार्थतानिराकरणम् । ततः 'अस्ति भाति प्रियं रूपं नाम चे'त्यंशपञ्चकम् । आद्यं त्रयं ब्रह्मरूपम्, द्वयं मायिकमुच्यत इति मतं जगतोऽब्रह्मत्वायोपक्षिप्य, तयोर्मायिकत्वनिराक-

---

१ धर्म । २ नैव दूषणेति पाठः ।

नानारूपेण प्रकटस्य रूपद्वये भेदप्रतीतिवत् । नाब्रह्मैवार्थः प्रतीयते ।
अतः कृतापि जिज्ञासा कुण्ठितैव भवेत् ध्रुवम् ॥ ३१ ॥
अनारभ्याधीतगार्ह्यस्मार्ता इव भवेद्यदि ।
प्रक्रिया महतां वृतिः स्वातन्त्र्यं चात्र तेन न ॥ ३२ ॥
धर्मार्थकाममोक्षाख्यं श्रेयः स्मार्तं न वैदिकम् ।
पुरुषेक्षावशेनैते साध्यसाधनतां गताः ॥ ३३ ॥
अलौकिको हि वेदार्थः प्रमाणान्तरगो न हि ।

रणमिति । एवं भेदवादे मायावादे च निराकृते तदग्रे अयं ग्रन्थः नाब्रह्मैवार्थः प्रतीयत इति । एवं प्रपञ्चस्य ब्रह्मभिन्नत्वे मायिकत्वे च निराकृते सति अब्रह्मैवार्थः प्रतीयत इति न । तथाच लोकनिपुणा मायावादिनश्चैवं मानयितुं शक्याः । अतोऽर्धजरतीयन्यायाद्वैदिकानां वेदान्तत्वप्रसिद्धिः, नतु भवदुक्तप्रकारकादेकवाक्यत्वादित्यर्थः ।

तेन सिद्धमाहुः अत इत्यादि । यतो भवदुक्तरीत्या वेदवेदान्तयोरेकवाक्यतया वक्तुमशक्यतया वेदान्तेषु वेदत्वस्यासिद्धत्वाज्जैमिनिकृता धर्मजिज्ञासा वेदान्तानसंगृह्णाना तदंशे ध्रुवं निश्चयेन कुण्ठितैव भवेत् । स्वाध्यायाध्ययनविधिना तदध्ययनस्याप्राप्तेः । ततश्च वैदिकाभिध्यानेन कृतमपि तेषां वेदत्वसमर्थनं व्यर्थमेवेत्यर्थः ।

ननु वेदान्तानामनारभ्याधीतत्वात्तदुक्ता आत्मज्ञानादयो धर्मा गार्ह्यस्मार्ता इवेति स्मृतिपादे स्मृतिविचारेणैव तेपि विचारिता एवेति न धर्मजिज्ञासायाः कुण्ठितत्वमित्येवं समर्थने, तदपि दूषयन्ति अनारभ्येत्यादि । वेदान्ता अनारभ्याधीता गार्ह्यस्मार्ता इव यदि भवेयुः, तदा महतां गृह्यकृतां स्मृतिकृतां च या प्रक्रिया प्रकारः वृत्तिर्वर्तनं व्यवहारः, स च तथा भवेत्, तेषां स्वातन्त्र्यं वेदभिन्नत्वं च भवेत् । गृह्यकाराः यत्र धर्मान् विचारयन्ति, तत्र 'अथ कर्माण्याचारादीनि गृह्यन्ते' 'अथ गार्ह्याणि वक्ष्यामः' 'अथातो गृह्यस्थालीपाकानां कर्मे'त्येवं प्रतिज्ञाय तत्तत्कर्मकालादिकं वदन्ति । स्मृतिकाराश्च यत्र वदन्ति, तत्र महतीषु स्मृतिषु 'अथातः सामयिकाचारिकान् धर्मान् व्याख्यास्यामः,' 'योगीश्वरं याज्ञवल्क्यं संपूज्य मुनयोऽब्रुवन् । अथातो हिमशैलाग्रे देवदानवसंकुले । व्यासमेकाग्रमासीन'मित्येवं धर्मकथनं प्रतिज्ञाय, स्थानविशेषे तत्तत्प्रश्नेन वदन्तीति प्रकारो दृश्यते । अमुकगृह्यसूत्रं अमुकस्मृतिरिति कर्तृनामपूर्वको व्यवहारश्च दृश्यते, तेषां वेदभिन्नत्वं च दृश्यते, तत्सर्वं वेदान्तेष्वपि भवेत्, येन तन्न वेदान्तेषु दृश्यते, तेनैते गार्ह्यस्मार्ता इव न । तथाच स्मृतिविचारेण तद्विचारसिद्ध्यभावा-

परमात्मविचारेण ते चत्वारो ह्यलौकिकाः ॥ ३४ ॥
धर्मे ब्रह्मणि च प्रोक्ताः फलत्वेन तथैव ते ॥ ३४ १/२ ॥

'विराजमभिसंपद्यते ।' 'अमृतीभवति ।' 'प्रजापतेरेव सायुज्यमुपैति ।' 'इदं सर्वं प्रजापतिः ।' 'न स पुनरावर्तते'। 'वशीयान् भवति ।' 'सनिमेषान् कामुका एनं स्त्रियो भवन्ति ।' 'य एवं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन' इत्यादि ।

जिज्ञासाकौण्ठ्यं दुर्वारमेवेत्यर्थः । कासुचित्स्मृतिषु मकारादर्शनात् । 'यद्वै किञ्च मनुरवदत्तद्भेषज'मितिश्रुतावपि मन्वादरदर्शनाच्च । प्रकारादिरप्रयोजक इत्याशंकायां युक्त्यन्तरमाहुः धर्मेत्यादि । मकारादर्शनेपि क्वचिदादरेपि स्मार्तं धर्मादिकं श्रेयो वैदिकं न । तत्र हेतुः जीवविचारितत्वम् । यत एते स्मार्ता धर्मादयः पुरुषेक्षावशेन पुरुषाणामृषीणां स्मरणपूर्वकविचारवशेन साध्यसाधनभावं प्राप्ताः । अतः मकाराभावेपि श्रुतौ क्वचिदादरेपि न सर्वे वैदिकाः । वेदान्तानां त्वपौरुषेयत्वात्तदुक्तो वेदार्थः स यतो हेतोरलौकिकः अतो हेतोः प्रमाणान्तरगो योगादिप्रमाणगम्यो न । अतस्तद्विचारस्यावश्यकत्वेऽपि यस्मान्न विचारः, तस्मात्सा तदंशे कुण्ठितैवेत्यर्थः । ननु फलं हि यज्ञैर्वेदे प्रतिपाद्यते, वेदान्तेषु तु यज्ञाप्रतिपादनात् फलाभावेन तेषां वेदोपरत्वम्, अतः किं तद्विचारेणेत्यतस्तदविचारेपि न धर्मजिज्ञासायाः कुण्ठितत्वमत आहुः परमात्मेत्यादि, धर्मे ब्रह्मणि चेति । धर्मकाण्डे ब्रह्मकाण्डे च । तत्र काण्डद्वयस्थाः श्रुतीर्दर्शयन्ति 'विराज'मित्यादि । अत्र विराजमित्यादयः पूर्वकाण्डस्थाः । 'न स पुनरावर्तत' इतिछान्दोग्योपनिषत्स्थम् । 'य एवं वेद प्रतितिष्ठती'ति भृगूपनिषत्स्थम् । तथा च पूर्वकाण्डवदुत्तरकाण्डेपि चतुर्णां फलानां श्रावणाद्वेदपरत्वमसंगतमिति मीमांसकमते धर्मजिज्ञासाकौण्ठ्यमपरिहार्यमेवेत्यर्थः । एवमत्र जिज्ञासाया कुण्ठितत्वसाधनेन धर्मो न सर्वस्य वेदस्यार्थः, किन्तु पूर्वकाण्डस्यैवार्थ इति सिध्यति । तथा सति वेदान्तेषु वेदत्वमपौरुषेयशब्दत्वाद्वा परमात्मवाक्यत्वाद्वा वक्तव्यम् । तदाप्येकार्थत्वाभावाद्विभागे साकांक्षत्वाभावाच्च तयोरेकवाक्यत्वाभावेन भिन्नशास्त्रत्वमेवेति कथं द्वयोरेकवाक्यत्वमिति तान् प्रत्याक्षेपः पर्यवस्यति । तत्र यदि 'प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते । एतं विदन्ति वेदेन तस्माद्वेदस्य वेदते'ति सायणीय ऐतरेयब्राह्मणभाष्ये संमतित्वेनोपन्यस्तात् श्लोकात् प्रत्यक्षाद्यगम्यश्रेयःसाधनस्यैव सर्ववेदार्थत्वमुपगम्यते, तदाप्यथातोऽलौकिकोपायजिज्ञासेत्यकथनाज्जिज्ञासायाः कुण्ठितत्वं दुर्वारमेवेति सिध्यति ।

अथ वेदाध्ययनं ब्रह्मचर्यं, वेदान्ताध्ययनं संन्यास इति तद्विचारः पृथगेव ।

समाप्तिश्च श्रूयते । शिक्षायां 'वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति' इत्यादिना उपनिषदनन्तरं पठिता । आचार्यान्तरेऽपि गुणोप-

तत्र व्यवहारे भट्टनयमंगीकुर्वन् मायावादी वा जैमिनीप्रणीतसंकर्षणकाण्डाभिमानी वा कुण्ठतां समाधत्ते, तदनुवदन्ति अथेत्यादि । नात्र वेदान्तार्थविचाराभावेन कुण्ठता । वेदाध्ययनस्य उपनयनानन्तरमध्ययनादिविधिना प्राप्तत्वात्तस्य चार्थज्ञानार्थत्वादर्थज्ञानस्य च विचारमन्तरेणासंभवात्तत्र विचारः पूर्वकाण्डस्यैवाध्ययनादिविधिनाक्षिप्यत इति तदर्थस्य धर्मस्यैवात्र जिज्ञासा प्रतिज्ञाता, न वेदान्तार्थस्यापि । वेदान्ताध्ययनं तु तैत्तिरीये भार्गव्यां विद्यायां 'भृगुर्वै वारुणिः वरुणं पितरमुपससार, अधीहि भगवो ब्रह्मेति, तस्मा एतत्प्रोवाचे'ति, छान्दोग्ये 'अधीहि भगव इति होपससाद सनत्कुमारं नारदस्तं होवाच यद्वेत्थ तेन मोपसीद, ततस्त ऊर्ध्वं वक्ष्यामी'त्यध्यापनाध्ययनलिंगात् सन्यास इति पूर्वं तदाधिकाराभावात् । पश्चान्मुमुक्षुत्वादिसाधनचतुष्टयसंपत्तिरूपे वा संकर्षणकाण्डोक्तेऽन्यस्मिन्वाधिकारे संपन्ने तदर्थं व्यासेन जैमिनिना च तद्विचारः पृथगेव कृत इति विषयभेदान्न धर्मजिज्ञासायाः कुण्ठता । नापि पृथग्विचारादेकवाक्यत्वस्य वेदत्वस्य वा हानिः । 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति ब्रह्मचर्येण यज्ञेन तपसा श्रद्धयाऽनाशकेने'तिवाक्येन वेदानां वेदान्तशेषत्वैकवाक्यत्वस्य वेदान्तेषु च मन्त्रब्राह्मणात्मकत्वेन वा अपौरुषेयशब्दत्वेन वा परमात्मवाक्यत्वेन वा वेदत्वस्य च सत्त्वादित्यर्थः ।

एवं मतान्तरेण प्रतिज्ञान्तरमालंब्य दोषे परिहृते तन्मतीयमेकवाक्यत्वप्रकारं दूषयितुं पूर्वोक्तं स्मारयन्ति समाप्तिश्चेत्यादि अनन्तरं पठितेति । एतदनुशासनमुक्त्वा समाप्तौ 'सैषा वेदोपनिष'दिति वाक्येन पठिता । तथा च यदि भवदुक्तरीत्यैकवाक्यत्वमभिमतं स्यात्, वेदसमाप्तिं अनन्तरभागस्योपनिषत्त्वं च न वदेत्, अतो न तथैकवाक्यत्वमित्यर्थः । ननु शिक्षायां 'वेदमनूच्ये'ति क्त्वाप्रत्ययेन वेदाध्यापनोपनिषदध्यापनयोरेककर्तृकता वेदाध्यापनस्य पूर्वकालिकता च लभ्यते, एकस्तत्रैवानुशासनात्, न तु शास्त्रसमाप्तिरपि, अतो यत्रैकाचार्यकृता, तत्रोपनिषदां पश्चात्पाठोऽर्थप्राप्तोऽनूद्यत इति न तयोः शास्त्रभेदकत्वम्, आचार्यान्तरेण तत्पाठने तदभावात्, अत कथमेकवाक्यत्वाभाव इत्यत आहुः आचार्यान्तरेपीत्यादि । आचार्यान्तरे यदध्ययनमापाद्यते, तत्किं ब्रह्मचर्ये

१ उपनिषत्समाप्त्योः ।

संहारन्यायेन पूर्वकाण्डाध्ययनमेव ब्रह्मचर्ये। नोत्तरकाण्डस्य। सौकर्यार्थमेव पाठान्तरम् । इदानीं विचारस्तु पश्चादेवेति नैकवाक्यता। अत एव विचारोऽपि पृथगेव। 'साङ्गोपनिषद' इति पृथक्पुराणेषु निर्देश इति। अथवा। कुत्रापि आश्रमे विचारोऽस्तु। नैकवाक्यता। न

उत संन्यासे। तत्र यद्याद्यः पक्षः, तदा तु गुणोपसंहारन्यायेन पूर्वकाण्डाध्ययनमेव ब्रह्मचर्ये, ब्रह्मचर्ये विहितं यत्पूर्वकाण्डाध्ययनं ब्रह्मचारिणः, तदध्यापनं वा तद्गुणभूतस्याचार्यान्तरस्य समानविषय एवाध्ययन अध्यापने उपसंहारप्राप्तेः। 'उपसंहारोऽर्थाभेदा'दितिसूत्रे तथैव सिद्धत्वात्। नोत्तरकाण्डस्य। समानविषयत्वाभावात्। अत आचार्यान्तरेऽपि तदध्ययनानन्तरं 'वेदमधीत्य स्नाया'दिति समावर्तनस्य प्राप्तेर्न तस्य शास्त्रसमाप्तिबाधकत्वम्, न वा उपनिषदामन्तर्येबाधकत्वम्। अतः शास्त्रभेदो निराबाधः। अथ संन्यासे, तदा तु तन्मते केवलज्ञानस्यैव मोक्षहेतुत्वाङ्गीकारा'द्विविदिषन्ती'ति श्रुत्या विविदिषायामेव वेदोक्तसाधनानामङ्गीकारेण ज्ञानशेषताया अपि वेदेष्वभावान्न तथाप्येकवाक्यत्वम्, इच्छाया अपुरुषार्थत्वे वेदानामपुरुषार्थपर्यवसायित्वं वेदप्रयोगाभावापत्तिश्चेत्यधिकं दोषद्वयमित्यर्थः। ननु यदि नैकवाक्यत्वम्, तदेदानीं कुत एकस्मादाचार्यादाचार्यान्तराद्वा ब्रह्मचर्ये एव पठन्ति, तदैव शिष्टाः पाठयन्ति चेत्यत आहुः सौकर्येत्यादि। पश्चादेवेति। साधनचतुष्टयसंपत्त्यानन्तर्यादिभिश्चन्द्रिरङ्गीकारात्तथेत्यर्थः। ननु तर्हि विचारपश्चात्त्वमधिकारभेदकृतम्, न शास्त्रभेदकृतमिति यदुक्तम्, तदप्याद्रियतामित्यतामित्यत आहुः अत एवेत्यादि। अत एवेति। शास्त्रभेदादेव। तत्र हेतुः साङ्ग इत्यादि। तथा च स्वकल्पितयुक्त्यपेक्षया उपबृंहणसिद्धस्य बलिष्ठत्वाद्वाक्यभेदपक्ष एव युक्त इति तन्नाद्रियत इत्यर्थः। ननु तर्हि यन्मते आश्रमान्तरेऽपि विचार इत्यङ्गीक्रियते, अलौकिकोपायवेदकत्वरूपं वेदत्वमादाय, तन्मते नैकवाक्यत्वमस्त्विति चेत्, तत्राहुः अथवेत्यादि। न वेदत्वमित्यादि। तन्मतेऽपि तादृशं वेदत्वमुपनिषदां न। यदि तथा जैमिन्यभिप्रेतं स्यात्, तदा जैमिनिः पूर्वं धर्मजिज्ञासां प्रतिज्ञाय तदवान्तरविचारत्वेन 'अथातः शेषलक्षणम्' 'अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासे'ति यथा मध्ये उक्तवान्, तथा पूर्वं 'अथातोऽलौकिकोपायजिज्ञासे'ति प्रतिज्ञाय पश्चादेव तद्विशेषविचारत्वेन धर्मजिज्ञासामुपासनाजिज्ञासां च प्रतिजानीयात्। तथा तु नास्तीति तादृशोपायविशेषवेदकत्वरूपं वेदत्वं तस्य नाभिप्रेतमुपनिषदाम्। अतो न तद्रीत्यापि वेदैकवाक्यत्वं वेदान्तानामित्यर्थः। एवं सर्वं तन्मतं दूषयित्वा वैदिकाभिध्यानाद्यत्तेन प्रत्यवस्थितम्, तस्य शैथिल्येन तदुत्तरस्य पूर्वमनुक्तत्वादिदानीं तत्स्मृत्वा कदाचित्पुनः प्रत्यवतिष्ठेदि-

वेदत्वमुपनिषदाम् । स्वरादिनियमस्तदन्तानामपि आचारपरंपरया । वाक्येन तूपयोगो 'यदेव विद्यया करोति' इति । तथापि कथमुपयोग इति चेत् । उच्यते । लौकिकेषु पदार्थेषु साङ्गो यज्ञोऽध्यस्यते, वैदिके तत्रार्थे वैदिकता संपद्यत इति । ब्रह्मवादेन सर्वस्यापि ब्रह्मत्वेऽवगते ब्रह्मण्येव यज्ञः प्रतिष्ठितोऽपि भवति । अयज्ञकालेऽपि वैदिकत्वं सिध्यति । ननु वेदान्तत्वं कथम् ।

त्यतस्तत्स्वरूपमाहुः स्वरादीत्यादि । अपिः गर्हायाम् । मूर्खः प्रत्यवस्थातेति । इदं तु प्रागेव विवृतमिति न पुनरुच्यते । तथा च तस्य शैथिल्यान्न तेन प्रत्यवस्थानं युक्तमित्यर्थः ।'यदेवे'तिवाक्योत्तरस्य पूर्वं सम्यगप्राप्तत्वात्तेन प्रत्यवतिष्ठासन्तं प्रत्याहुः वाक्येनेत्यादि । अनेन वाक्येन तूपयोगमात्रमुच्यते, न तु शेषता नियन्तुं शक्यते । तथा सति फलश्रुतिकाण्डासप्राप्त्योर्विरोधापत्तेरिति प्रागेवोक्तमिति न तेनापि प्रत्यवस्थानावकाश इत्यर्थः । ननु श्राद्धे ज्ञानोपयोग आनन्त्यार्थः, 'ज्ञाननिष्ठाय देयानि कव्यान्यानन्त्यमिच्छते'ति कथनात् । सोपि संप्रदानपुरुषद्वारा । अत्र तु वाक्ये कर्ममात्रपौष्कल्यं फलत्वेनोच्यते। तत्र द्वारं चेन्न वक्तुं शक्ष्यन्ति, तदा परा जेष्यन्तीत्याशयेनाह तथापीत्यादि। तत्रोत्तरत्वेन सोपपत्तिकं प्रकारमाहुः उच्यत इत्यादि । लौकिकैः पदार्थैर्यज्ञो न सिध्यतीति गुणकर्मबोधकै'र्व्रीहीन्प्रोक्षती'त्यादिवाक्यैः साङ्गो यज्ञो लौकिकेषु पदार्थेष्वारोप्यते, वैदिके कर्मणि तदुपकरणभूतस्य पदार्थस्य मूर्तेर्देवतासन्निधानेन देवतात्ववत् वैदिकता संपद्यत इत्येतदर्थम् । एतत्पूर्वकाण्डे सिद्धम् । उत्तरकाण्डे 'सन्मूलाः सोम्येमाः प्रजाः' 'इदं सर्वं यदयमात्मे'त्यादिवाक्यश्रावितेन ब्रह्मवादेन सर्वस्य प्रपञ्चस्य प्रापञ्चिकस्य च वस्तुनो ब्रह्मत्व अवगते यज्ञोपि सद्रूपत्वात् ब्रह्मात्मक एव भवति । किञ्च । यजमानस्यापराभावाय प्रतिष्ठितोपि भवति । तदुक्तं तैत्तिरीयसंहितायां 'वासिष्ठो ह सात्यहव्यो देवभागं पप्रच्छ यत्सं ञ्जयान्बहुयाजिनो योऽयजो यज्ञे यज्ञं प्रत्यतिष्ठिपाय यज्ञपता३विति स होवाच यज्ञपता३विति सत्याद्वै संजयाः पराबभूवुरिति होवाच यज्ञे वाव यज्ञः प्रतिष्ठाप्य आसीद्यजमानस्यापराभावायेती'ति । किञ्च । अयज्ञकालेपि पदार्थानां ब्रह्मात्मत्वावगतौ तेषां वैदिकत्वं सिध्यति । तथाचात्रापराभावादिफलार्थं ब्रह्मवादेन सर्वस्य ब्रह्मात्मावगतिर्द्वारमित्यर्थः । एवमुत्तरदानेन वैदिके मते वेदान्तानां पूर्वोक्तार्धजरतीयन्यायाद्वेदान्तत्वमुपसंहृतम् । तेन काण्डद्वयस्यापि 'सर्वे वेदा यत्पदमामनन्ती'ति, 'ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यान'मित्यादिश्रुतिभिः, 'वेदैश्च सर्वैरहमेव वेद्यः' 'वेदास्त्रिकाण्डविषया ब्रह्मात्मविषया इमे, परो-

तच्च कृष्णप्रसादेन मायावादो निराकृतः ॥ ३५ ॥
आवैदिको महादेवस्तत्र साक्षी न संशयः ।
ये वैदिका महात्मानस्तेषां चानुमतिस्तथा ॥ ३६ ॥
अवेदविन्न मनुते मया चोपेक्षितः पुनः ।
स्थापितो ब्रह्मवादो हि सर्ववेदान्तगोचरः ॥ ३७ ॥
काशीपतिस्त्रिलोकेशो महादेवस्तु तुष्यतु ।
कस्यचित्त्वत्र सन्देहः स मां पृच्छतु सर्वथा ॥ ३८ ॥

क्षवादा ऋषयः परोक्षं च मम प्रिय'मित्यादिस्मृतिभिश्च ब्रह्मविषयत्वेन, 'फलश्रुतिरियं नृणां न श्रेयो रोचनं परम्, श्रेयोविवक्षया प्रोक्तं यथा भैषज्यरोचन'मित्यादिभिर्मोक्षैकप्रयोजनत्वेन चैकवाक्यत्वम्, नान्यथा । तच्चेनाङ्गीक्रियते, तदा कथमपि नैकवाक्यत्वमिति तन्मत उत्तरकाण्डस्य वेदान्तत्वं न कथमपि सिध्यतीति तान् पर्यनुयुञ्जते ननु वेदान्तत्वं कथमिति । कर्ममीमांसकमायावादिनोर्मतमालंब्य मां पर्यनुयुञ्जानैरुत्तरकाण्डस्य वेदान्तत्वं स्वस्वमतेन समर्थनीयमित्यर्थः ।

एवं पर्यनुयुज्य पत्रावलम्बनमुपसंहरन्ति तच्चेत्यादि । तत् एकवाक्यतापादकं मीमांसकादिमतं मायावादश्च कृष्णप्रसादेन निराकृतः, न तु युक्तिमात्रेण । कृष्णप्रसादबीजं त्वत्र भगवन्मतब्रह्मवादस्थापनम् । 'एष तेभिहितः कृत्स्नो ब्रह्मवादस्य संग्रह' इत्युद्धवं प्रत्येकादशे भगवद्वाक्यात् । ब्रह्मवादस्वरूपं तु 'सर्वे वेदा यत्पदमामनन्ति' 'इदं सर्वं यदयमात्मा' 'वेदैश्च सर्वैरहमेव वेद्यः' 'वेदाखिलकाण्डविषया ब्रह्मात्मविषया इमे,' 'अहमेवासमेवाग्र' इत्यादिश्रुतिस्मृतिप्रतिपादितं बोध्यम् । अत्र मानमाहुः आवैदिक इत्यादि । महादेवस्य आसमन्ताद्वैदिकत्वं तु 'वेदः शिवः शिवो वेदः' 'वेदाध्यायी सदाशिव' इतिशिवपुराणवाक्याद्बोध्यम् । अनुमतिरिति । साक्षिणीति शेषः । ननु यच्छब्दार्थविचारेणोक्तम्, तत् मीमांसकादिभिर्वैदिकैर्मन्तव्यम्, नतु नैयायिकाद्यैः, अतो नैतावता निर्वाह इत्यत आहुः अवेदविदिति । तथा च 'एतेन शिष्टापरिग्रहा व्याख्याता' इतिसूत्रे तेषां तत्त्वावबोधनात्तेऽप्रयोजका इति तदनादरेप्यक्षतिरित्यर्थः । ननु महादेवादेः साक्षित्वं कुतो हेतोरित्यत आहुः स्थापित इत्यादि । तथा च तोषादेव साक्षित्वं करिष्यतीत्यत उच्यते इत्यर्थः । ननु शिवतोषार्थं इदं चेदेवं पत्रावलम्बनस्य किं प्रयोजनमत आहुः कस्यचिदित्यादि । प्रतिवादिनः संदेहनिराकरणमेतत्प्रयोजनमि-

न भयं तेन कर्तव्यं ब्राह्मणानामियं गतिः ।
डिण्डिस्तु वादितो द्वारि विश्वेशस्य मयात्र हि ॥ ३९ ॥
विद्वद्भिः सर्वथा श्राव्यं ते हि सन्मार्गरक्षकाः ॥ ३९ ॥

इति श्रीमद्वल्लभाचार्यविरचितं पत्रावलम्बनं संपूर्णम् ।

त्यर्थः । वादे जयपराजयसंभवात्तत्कृतं भयं न कर्तव्यमित्यर्थः । तत्र हेतुः ब्राह्मणानामियं गतिरिति । पूर्वं याज्ञवल्क्यादिभिस्तथैव करणात्तत्र न दोष इत्यर्थः । डिण्डिस्त्विति । एतद्वादस्याप्रच्छन्नत्वादित्यर्थः । एवं करणप्रयोजनमाहुः विद्वद्भिरिति । तथा च सन्मार्गरक्षणमेतत्करणप्रयोजनमित्यर्थः ।

एष पुष्पाञ्जलिः श्रीमदाचार्यचरणाम्बुजे ।
निवेदितो मया तेन चापलं मे क्षमन्त्विति ॥ १ ॥

इतिश्रीमद्वल्लभाचार्यचरणैकतानपीताम्बरात्मजपुरुषोत्तमेन विरचितं
पत्रावलम्बनविवरणं संपूर्णम् ।